# ॥ શ્રીકૃષ્ણચન્દ્રાષ્ટકમ્ ॥

.. shrIkRiShNachandrAShTakam ..

sanskritdocuments.org

August 20, 2017

# .. shrIkRiShNachandrAShTakam ..

## ॥ શ્રીકૃષ્ણચન્દ્રાષ્ટકમ્ ॥

## Sanskrit Document Information

Text title : kRRiShNachandrAShTakam

File name : kRRiShNachandrAShTakam.itx

Category : aShTaka, vishhnu, krishna

Location : doc_vishhnu

Language : Sanskrit

Subject : philosophy/hinduism/religion

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : May 17, 2017

Send corrections to : sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીકૃષ્ણચન્દ્રાષ્ટકમ્ ॥

મહાનીલમેઘાતિભવ્યં સુહાસં શિવબ્રહ્મદેવાદિભિઃ સંસ્તુતશ્ચ ।
રમામન્દિરં દેવનન્દાપદાહં ભજે રાધિકાવલ્લભં કૃષ્ણચન્દ્રમ્ ॥ ૧॥

રસં વેદવેદાન્તવેદ્યં દુરાપં સુગમ્યં તદીયાદિભિર્દાનવઘ્નમ્ ।
લસત્કુણ્ડલં સોમવંશપ્રદીપં ભજે રાધિકાવલ્લભં કૃષ્ણચન્દ્રમ્ ॥ ૨॥

યશોદાદિસંલાલિતં પૂર્ણકામં દૃશોરઞ્જનં પ્રાકૃતસ્થસ્વરૂપમ્ ।
દિનાન્તે સમાયાન્તમેકાન્તભક્તૈર્ભજે રાધિકાવલ્લભં કૃષ્ણચન્દ્રમ્ ॥ ૩॥

કૃપાદૃષ્ટિસમ્પાતસિક્તસ્વકુઞ્જં તદન્તઃસ્થિતસ્વીયસમ્યગ્દશાદમ્ ।
પુનસ્તત્ર તૈઃ સત્કૃતૈકાન્તલીલં ભજે રાધિકાવલ્લભં કૃષ્ણચન્દમ્ ॥ ૪॥

ગૃહે ગોપિકાભિર્ધૃતે ચૌર્યકાલે તદક્ષ્ણોશ્ચ નિક્ષિપ્ય દુગ્ધં ચલન્તમ્ ।
તદા તદ્વિયોગાદિસમ્પત્તિકારં ભજે રાધિકાવલ્લભં કૃષ્ણચન્દ્રમ્ ॥ ૫॥

ચલત્કૌસ્તુભવ્યાપ્તવક્ષઃપ્રદેશં મહાવૈજયન્તીલસત્પાદયુગ્મમ્ ।
સુકસ્તૂરિકાદીપ્તભાલપ્રદેશં ભજે રાધિકાવલ્લભં કૃષ્ણચન્દ્રમ્ ॥ ૬॥

ગવા દોહને દૃષ્ટરાધામુખાબ્જં તદાનીં ચ તન્મેલનવ્યગ્રચિત્તમ્ ।
સમુત્પન્નતન્માનસૈકાન્તભાવં ભજે રાધિકાવલ્લભં કૃષ્ણચન્દ્રમ્ ॥ ૭॥

અદઃ કૃષ્ણચન્દ્રાષ્ટકં પ્રેમયુક્તઃ પઠેત્કૃષ્ણસાન્નિધ્યમાપ્નોતિ નિત્યમ્ ।
કલૌ યઃ સ સંસારદુઃખાતિરિક્તં પ્રયાત્યેવ વિષ્ણોઃ પદં નિર્ભયં તત્ ॥ ૮॥

॥ ઇતિ શ્રીરઘુનાથપ્રભુવિરચિતં શ્રીકૃપ્ણચન્દ્રાષ્ટકં સમ્પૂર્ણમ્ ॥

Proofread by PSA Easwaran psaeaswaran at gmail.com

.. shrIkRiShNachandrAShTakam ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLATEX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*